Digitized by Arya Samaj Foundation Chennai and eGangotri

074996

Easy
Stu

R
460
SAT-S

Sanskrit Self Teacher

PART 8

R460,SAT-S
074996

By

Pandit Dr. S. D. SATWALEKAR

R
460
SAT-S

तमसो मा ज्योतिर्गमय
श्री स्वाध्याय-मण्डल
पारडी [जि. बलसाड]

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Forms of Cases

In this book great stress is laid on the forms of cases. When the students study this book, if they give more attention, it will be very easy for them to study the lessons later on.

It is hoped that the students will pay more attention in this matter so that there may be good progress in Sanskrit.

— The Author

First Edition 1976

Printed & Published by **V. S. Satwalekar,**
Swadhyaya Mandal, Bharat-Mudranalaya,
PARDI, Dist. Valsad (Gujarat) India

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Self Teacher

PART 8

Lesson 1

The students know already the forms of the masculine nouns ending in अ. Still, for the sake of reminding we give them again here.

Students will see the forms of these two. In these there is some difference.

तृतीया एकवचन— जनेन रामेण
षष्ठी बहुवचन— जनानां रामाणां

Here, in the form of the noun 'जन' the suffix 'न' after being added to the form of the noun 'राम' changes itself into 'ण'. The rule is as follows—

Rule

The 'न' coming after 'र्' or 'ष्' is changed into 'ण'. And even if there are the vowels, or the letters क, ख, न, घ, ङ, प, फ, ब, भ, म, ह, य, व, र in the middle, 'न' becomes 'ण'. Example—

×

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The word रामेण is formed by the letters र् + आ + म् + आः If at the end, the suffix 'इन' of the Instrumental case, comes, [राम + इन] [र् + आ + म् + अ + इ] + न = रामेन or रामेण is formed i. e. even between the letters 'र्' and 'न' the letters आ + म् + अ + इ are existing, according to the above rule, because there are the vowels and 'म' of the series, 'न' becomes 'ण'; and the form रामेण is formed. In this way, in the case of रामाणाम् also, by the same rule, 'न' becomes 'ण'. Thus in other places also; जनेन, जनानां, there 'र्' or 'ष' is not existing so न does not become ण. Let the students pay careful attention here.

पटः	= Cloth	ज्वरः	= Fever
पाकः	= boiled food	भृत्यः	= Servant
दीपः	= Lamp	बुधः	= wise man
योधः	= warrior	कपोतः	= A dove
तरंगः	= wave	आश्रमः	= Hermitage
आतपः	= Sun's rays	पायसः	= Sweet rice milk
ग्रन्थः	= Book	वायसः	= A crow
पार्थिवः	= King	वैद्यः	= A doctor

But in the word 'रथेन' there are र् थ् ए न् and थ is excluded, that is why न is not changed into ण. The न् coming at the end of the word is not changed. Ex : रामान्

संस्कृत–वाचनः–पाठः

इदानीं भोजनस्य समयः जातः। किं पाकः सिद्धः वा न ? यदि पाकः सिद्धः अस्ति, तर्हि इदानीं एव भोजनाय अहं आगन्तुं इच्छामि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वया अत्र दीपः किं न स्थापितः ? शीघ्रं त्वं तत्र गच्छ, दीपं च अत्र आनय ।

सः मनुष्यः ज्वरेण पीडितः अस्तिः । इदानीं तस्य शरीरे अतीव ज्वरः अस्ति । अतः एतत् औषधं तस्मै देहि ।

तव भृत्यः इदानीं अत्र नास्ति किम् ? तेन ह्यः किं कृतम् ? येन त्वं कुपितः असि ।

बुधः सदा योग्यं वचनं एव उपदिशति । अतः बुधस्य एव मित्रता सम्पादनीया ।

योधे धैर्यं भवति । शौर्यं अपि तत्रैव भवति ।

यदि तव गृहे पायसः अस्ति, तर्हि मह्यं देहि । अहं पातुं इच्छामि ।

वायसः कठोरं शब्दं करोति, न तथा कोकिलः । कोकिलः मधुरं शब्दं करोति ।

मम आश्रमे उत्तमः कोकिलः अस्ति । सायंकाले तस्य मधुरं शब्दं श्रुत्वा मम हृदयं संतोषं प्राप्नोति ।

Lesson– 2

Now learn the following words—

अकारान्त पुल्लिंग शब्द

द्वेषः	= enemity	दमः	= control of external senses
वर्णः	= Colour, class	शमः	= control of internal senses
आर्यः	= Arya	दुर्जनः	= a bad man
छात्रः	= Disciple, a student	यागः	= yajna, oblation in the fire
अध्यापकः	= teacher	धीरः	= Brave man

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The forms of these are the same as masculine nouns ending in अ. The students can frame the forms and make sentences.

संस्कृत–वाक्यानि

१. यथा गर्दभस्य शब्दः, तथा एव उष्ट्रस्य रूपम् । २. उष्ट्रस्य विवाहे गर्दभः गायकः भवति । ३. गर्दभस्य विवाहे उष्ट्रः नर्तकः भवितुं अर्हति । ४. यथा मूषकस्य मार्जारेण सह स्वाभाविकः द्वेषः अस्ति, तथैव सिंहस्य गजेन सह वैरं अस्ति । ५. यत्ने कृते यदि न सिध्यति, तत्र कः दोषः ? ६. बुधः सर्वं जानाति, न तथा मूढः ७. दुर्जनं प्रथमं वंदेत्, सज्जनं तदनंतरम् । ८. धीरः आचार्यः यथा उपदिशति, तथा एव स्वयं आचरति । ९. शिष्यः नमस्कृत्य आचार्यात् विद्यां गृह्णाति ।

Translation

1. As is the noise of an ass, so is the form of a camel. 2. At the marriage of a camel, the ass is the songster. 3. At the marriage of an ass, the camel is fit to be a dancer. 4. Just as there is a natural enemity of a rat with a cat, so also there is enemity of a rat with a cat, so also there is enemity of a lion with an elephant. 5. If after trial, there is no success, what is the fault in it? 6. As wise man knows all, so a fool does not. 7. A bad man should be bowed to, at first and then a good man. 8. A brave preceptor acts himself, as he preaches. 9. A disciple acquires learning from the teacher by humility (bowiny down).

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत--वाचन--पाठः

तृषाशमनार्थं जलस्य पानं अवश्यं कर्तव्यम्। प्राणायामेन प्राणस्य बलस्य वर्धनं भवति। ध्यानेन मनःशक्तेः संवर्धनं भवति।

रावणस्य हननं रामेण कृतम्। दुर्गं आश्रित्य राक्षसः युद्धं कर्तुं न शक्तः।

वृक्षस्य पत्रं पुष्पं फलं च सर्वं उत्तमं अस्ति। पुष्पस्य उत्तमः गंधः, फलस्य शोभनः रसः, पत्रस्य वर्णः च आनंदकरः भवति।

सः एव वीर्यवान् भवति, यः मरणात् न भीतः। यः मरणात् भीतः सः भीरुः इति उच्यते। राज्यस्य हेतोः क्षत्रियेण किं पातकं न क्रियते?

युद्धे शत्रुं निहत्य पापं न भवति। युद्धात् यदि पलायनं क्रियते, तर्हि पातकं भवति।

यथा बुधः स्वकीयं रक्षणं कर्तुं समर्थः अस्ति, न तथा अज्ञः मूढः मनुष्यः। अतः ज्ञानं अवश्यं प्राप्तव्यम्।

आदौ इंद्रियाणि नियम्य ज्ञाननाशनं क्रोधं कामं च जहि। तेन एव नरः सुखी भवति।

Lesson 3

In this lesson forms of masculine nouns ending in 'इ' are shown.

रविः = The sun.

Case	Singular	Dual	Plural
१	रविः	रवी	रवयः
सं०	हे रवे	हे रवी	हे रवयः
२	रविम्	रवी	रवीन्
३	रविणा	रविभ्याम्	रविभिः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४	रवये	रविभ्याम्	रविभ्यः
५	रवेः	रविभ्याम्	रविभ्यः
६	रवेः	रव्योः	रवीणाम्
७	रवौ	रव्योः	रविषु

In this word, also, in the forms रविणा and 'रविणाम्' 'न' has become 'ण' according to the rlue shown in the previous lesson. See some more masculine nouns ending in 'इ'.

शब्द

पाणिः = A hand	रविः = The sun
मुष्टिः = A fist	इषुधिः = Arrows' store
ऋषिः = A Rishi	ग्रन्थिः = A knot
रश्मिः = Ray	कपिः = A monkey
नृपतिः = A king	दुंदुभिः = A big drum
भूपतिः = A king	प्रजापतिः = A protector of the subjects, (A king)

संस्कृत–वाचन–पाठः

त्वं एकेन पाणिना इदानीं किं करोषि ? सः पाणौ धनं गृह्णाति । सः मुष्टिना युद्धं करोति । पुरुषेण मुष्टियुद्धं अवश्यं कर्तव्यम् । सः मणीनां मालां पुत्रस्य कंठे स्थापयति । यदा मणिषु सूत्रं प्रविष्टं भवति, तदा तेषां माला भवति ।

रविः प्रातःसमये आगच्छति । सः तस्य उदयः इति उच्यते । सः सूर्यः सायंकाले अस्तं गच्छति । रात्रिसमये अंधकारः भवति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मया उदधिः दृष्टः । यदा अहं मुंबापुरीप्रदेशे गतः, तदा तत्र उदधिः मया दृष्टः । उदधिजलात् एव लवणं प्राप्यते । यदा उदधेः जलं सूर्यस्य रश्मिभिः शुष्यति, तदा लवणं भवति ।

इषुधौः बाणाः भवन्ति । वीरः इषुधेः बाणं गृह्णाति ।

ऋषिः आश्रमे स्थित्वा किं करोति ? सः वेदमंत्रान् उपदिशति तेषां मननं ते कुर्वन्ति ।

मुनिः मौनं साधयति । मननाय मौनं एव आवश्यकं अस्ति ।

सूर्यस्य रश्मिः अद्य शोभनः अस्ति । यदा मेघाः भवन्ति, तदा एव सूर्यस्य रश्मिः न भवति ।

नृपतिः नरान् पालयति । भूपतिः भूमिं रक्षति । प्रजापतिः प्रजानां पालनं करोति ।

त्वया दुंदुभेः शब्दः श्रुतः न वा ? इदानीं दुंदुभेः महान् शब्दः भवति ।

Note

The students can frame many forms like this. See some sentences with sandhis now.

Sentences with Sandhi

त्वमेकेन पाणिनेदानीं किं करोषि ? इदानीं मम पाणिर्मलिनोऽस्ति । स मुष्टिना युद्धं करोति । तेन स मुष्टिभिस्ताडितः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Lesson 4

Learn the following words in this lesson

पठितुं = In order to read
पुनः = again
काष्ठं = fire wood
निर्माणं= Creation, making
मृत्तिका = mud
रथांगं = a part of a chariot
श्रोता = hearer
पूजकः = a worshipper
विचारणा = idea
मनोबलं = power of the mind
कंदुकः = A ball
मह्यं = for me
तुभ्यं = for you

वस्त्रकारः = a weaver
रथकारः = a maker of a chariot
कुंभकारः = a potter
सुवर्णकारः = a goldsmith
लोहकारः = a blacksmith
मालाकारः = a gardner
याजकः = he who performs yajna
धारयित्वा = having borne
योगाचारः = practice of yoga
यशोवर्धकः = He who enhances fame
अनध्यायः= leisure, a holiday

By learning these words well, the students will easiiy understand the following sentences.

संस्कृत – वाचन – पाठः ।

हे मित्र ! तव पुस्तकं यदि त्वं अधुना न पठसि तर्हि मह्यं देहि । अहं तत् श्वः वा परश्वः वा तुभ्यं पुनः दास्यामि ।

रामः रथेन अन्यं ग्रामं गच्छति । विष्णुमित्रः जलरथेन अन्यदेशं गंतुं इच्छति । गोपालः आकाशस्थेन विमानेन अन्यं प्रदेशं गच्छति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वस्त्रकारः सूत्रेण वस्त्रं करोति । रथकारः काष्ठात् रथस्य निर्माणं करोति । कुंभकारः मृत्तिकापात्रं करोति । सुवर्णकारः सुवर्णस्य आभूषणं करोति । मालाकारः पुष्पाणां मालाः करोति । लोहकारः लोहस्य रथांगानि करोति ।

याजकः यजनं करोति । पूजकः पूजां करोति । शिक्षकः शिष्यं पाठयति ।

योधः युद्धं करोति । सैनिकः शस्त्रं गृहीत्वा धावति । वीरः अश्वं आरोहति । राजा सैनिकान् प्रेरयति । मंत्री युद्धस्य विचारणां करोति ।

ऋषिः वने आश्रमस्थाने तपः तपति । मुनिः मौनं धारयित्वा मननं करोति । योगी योगाचारं आश्रित्य स्वकीयं मनोबलं वर्धयति ।

ये मनुष्याः असावधः वर्तन्ते तेषां योगक्षेमं नैव कल्पते । असाधूनां मनुष्याणां विनाशः एव शीघ्रं भवति । तेषां कः अपि तरणोपायः नैव अस्ति ।

कुलस्य यशोवर्धनाय सदाचारसंपन्नः पुत्रः आवश्यकः अस्ति । एकः अपि सत्पुत्रः यशोवर्धकः भवति ।

अहं अद्य सायंकाले तव गृहं प्रति आगमिष्यामि । त्वं तदा तत्र भविष्यसि किम् ? यदि त्वं तत्रैव स्थास्यसि, तर्हि अहं आगमिष्यामि । नोचेत् नैव आगमिष्यामि ।

अत्र गुरुः इदानीं पर्यन्तं न आगतः, तथा च शिष्यः अपि न आगतः । इदानीं अद्य कः अपि नैव आगमिष्यति । अद्य अनध्यायः अस्ति ।

Make the sandhis of the underline a words.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sentences with Sandhi

हे मित्र ! तव पुस्तकमहं पठितुमिच्छामि । कुत्राऽस्ति तव पुस्तकम् ? यदि त्वमधुना तन्न पठसि तर्हि तन्मह्यं देहि । अहं तच्छ्वो वा परश्वो वा तुभ्यं पुनर्दास्यामि । रामो रथेनान्यं ग्राम गच्छति । विष्णुमित्रो जलरथेनान्यं देशं गन्तुमिच्छति । गोपाल आकाशस्थेन विमानेनान्यं प्रदेशं गच्छति ।

Lesson 5

संस्कृत–वाक्यानि

रामायणम् ।

१ सुमंत्रः रामं ववन्दे तं उवाच च । २ हे राम ! पिता त्वां द्रष्टुं इच्छति । गम्यतां तत्र । मा चिरय इति । ३ एवं उक्तः नरसिंहः रामः सीतां संमान्य अंतःपुरं अत्यगात् । अभिवाद्य च पितुः चरणौ सुसमाहितः कैकेय्या अपि चरणौ ववन्दे । ४ नृपतिः तु दीनः न शशाक ईक्षितुं, किं पुनः अभिभाषितुम् ? तस्य नरपतेः रूपं भयावहं दृष्ट्वा भयं आपन्नः रामः । ५ कैकेयीं अभिवाद्य एवं अब्रवीत्–किंश्चित् मया न अपराद्धं येन कुपितः पिता ? किंचित् न भरते शत्रुघ्ने मातृणां वा मे अशुभम् ? ६ नृपे तु कुपिते मुहूर्तमपि जीवितुं न उत्सहे । ७ कैकेयी तदा आत्महितं वचः उवाच । राम ! राजा न कुपितः । न अस्य किंचन व्यसनं । मनोगतं तु किंचित् त्वद्भयात् न अनुभाषते । ८ त्वां अप्रियं वक्तुं न प्रवर्तते अस्य

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाणी । एष हि पुरा मां अभिपूज्य वरं च दत्त्वा पश्चात् तप्यते राजा, यथा अन्यः प्राकृतः । ९ एतत् श्रुत्वा रामः व्यथितः उवाच– अहो ! हे देवि ! मां एवं वक्तुं न अर्हसि । राज्ञः वचनात् पावके अपि पतेयम् । १० रामः द्विः न अभिभाषते । ११ ततः कैकेयी तं दारुणं वचः उवाच । १२ हे राम ! ते पित्रा मे द्वौ वरौ दत्तौ । तत्र मे याचितः अधुना राजा, भरतस्य अभिषेचनं तव च अद्य एव दण्डकारण्ये गमनम् । पितुः सन्निदेशे तिष्ठ । १३ नव पंच च वर्षाणि त्वया अरण्यं प्रवेष्टव्यम् । भरतः तु इमां पृथिवीं प्रशास्तु । १४ मरणोपमं वचनं श्रुत्वा रामः न विव्यथे । कैकेयीं च अब्रवीत् ।

Translation

(1) Sumantra bowed to Rama and said– (2) O Rama, (your) father wants to see you. Go there. Let no time be lost. (3) Having been told thus, Rama, a lion among men, having honoured Seeta, went into the interior of the palace. Throwing down at the feet of his father, he carefully bowed at the feet of Kaikeyee also. (4) When the king was not able to see even, due to great humility, how could he talk ? Seeing the fearful condition of the king, Rama got afraid. (5) Bowing down to Kaikeyee, he said– 'Have I committed any fault by which my father has become angry ? I hope I have not done any harm regarding Bharata, Shatrughna, and my mothers. (6) If the king becomes angry, I do not wish to live even for a moment. (7) Kaikeyee, then said her selfish words– 'O Rama, the king is not angry, nor there is any

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

pain in him; he does not speak his idea that is in his mind, for fear of you. (8) His speech does not come forward to say anything that is harmful to you. This king, having at first honoured me, and having given me boons, repents afterwards, like other ordinary men. (9) Hearing this, Rama said with sorrow, O trash ! revered lady, you should not tell me so. I shall fall even into the fire on the words of the king. Tell me, therefore, what the king wants. (10) Rama does not say twice. (11) Then Kaikeyee said the cruel words. (12) "O Rama ! Two boons had been given to me by your father. I asked them now, namely– Let there be the installation of Bharata in the kingdom and your going away to Dandaka forest today only. If you wish to make the king as well as yourself a true-keeper of vows, then be at the command of the king (13) You have to be in the forest for nine and five years (fourteen). Let Bharat reign this earth." (14) Hearing the words, like death, Rama was not aflicted with sorrow, and told Kaikeyee.

Note

Let the students practice these sentences well. In Sanskrit, some words are before and some after (i. e. not in a regular order). Let them see the meaning by the connections, before and after, and understand it.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sentences with Sandhis

नव च पञ्च वर्षाण्यरण्यं त्वया प्रवेष्टव्यम्। भव जटाचीरधार्यभिषेकं त्यक्त्वा। प्रशास्त्विमां पृथिवीं भरतः।

यदि पाकः सिद्धोऽस्ति, तर्हीदानीमेव भोजनायाहमागन्तुमिच्छामि। रामः ववन्दे च पितुश्चरणौ, सुसमाहितः कैकेय्या अपि चरणौ वन्दितवान्। दशरथो नृपतिस्तु दीनः नेक्षितुं शशाक, किं पुनः रामेण सहाभिभाषितुम्? तस्य दशरथस्य नृपते रूपं भयजनकं दृष्ट्वा भीतिमापन्नो रामः कैकेयीमभिवाद्येदमब्रवीत्। क्वचिन्मया नापराद्धं येन मे पिता कुपितः?

Lesson 6

In this lesson forms of masculine nouns ending in 'उ' are being shown—

सुनुः = a son, boy

Case	Singular	Dual	Plural
१	सूनुः	सूनू	सूनवः
सं०	हे सूनो	हे सूनू	हे सूनवः
२	सूनुं	सूनू	सूनून्
३	सूनुना	सूनुभ्यां	सूनुभिः
४	सूनवे	सूनुभ्यां	सूनुभ्यः
५	सूनोः	सूनुभ्यां	सूनुभ्यः
६	सूनोः	सून्वोः	सूनुनाम्
७	सूनौ	सून्वोः	सूनुषु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

In this way forms of masculine nouns ending in 'उ' are formed.

In the forms of the word 'गुरु' 'गुरुणा, गुरूणां' 'न' becomes 'ण' according to the rule already given because these is 'र' in this word.

Note

The 'र' not having existed in the word सूनु, 'न' did not become 'ण' in these forms. Let the students observe this well.

Masculine nouns ending in 'उ'

इक्षुः = sugarcane	ऋतुः = yajna
मेरुः = mountain of meru	तंतुः = yarn
सेतुः = a bridge	इषुः = An arrow
भिक्षुः = a begger	स्तनयित्नुः = a cloud
शिशुः = a boy	बाहुः = an arm
ऋतुः = season	जंतुः = a living being

संस्कृत–वाचन–पाठः

यथा गुरुः वदति तथा एव त्वं पठ ।

मृत्युः सर्वस्य ईशः अस्ति । मृत्युना सर्वं व्याप्तम् । मृत्यवे त्वं किं दास्यसि ? मृत्योः आत्मानं रक्ष ।

इक्षोः रसः अतिमधुरः भवति । इक्षुरसात् एव गुडः भवति । इक्षुं भक्षय इदानीम् ।

स भृत्यान् इक्षुभिः ताडयति । इक्षूणां रसं तस्मिन् भांडे स्थापय ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मेरुः नामकः एकः पर्वतः अस्ति। उत्तरदेशे मेरोः स्थानं अस्ति। मेरौ देवानां एका सभा आसीत्।

यदा वायुः रात्रौ न वाति, तदा अतीव कष्टं भवति। वायुना एव सर्वे जन्तवः जीवन्ति। वायौ एव प्राणः अस्ति।

सेतुं कृत्वा नदीपारं गच्छ। यत्र सेतवः भवन्ति तत्र सुखेन मनुष्याः गन्तुं समर्थाः भवन्ति।

ईश्वरः सर्वस्य प्रभुः अस्ति। राजा राष्ट्रस्य प्रभुः भवति। प्रभुणा मह्यं धनं दत्तम्। अहं प्रभोः चरणौ वंदे। प्रभुं एव शरणं गच्छ।

भिक्षवे अन्नं वस्त्रं च देहि।

तत्र मम शिशुः क्रीडति। तं शिशुं पश्य। तेन शिशुना पात्रं तत्र एव स्थापितम्। शिशवे दुग्धं देहि।

एषः वसंतः ऋतुः अस्ति। द्वितीये ग्रीष्मे ऋतौ त्वं कुत्र गमिष्यसि ?

Note

In this way, let the students form the forms of the nauns mentioned above, and construct sentences; thus let them improve the practise of constructing sentences. The meanings of some of the difficult words in the above lesson, ar ase follow—

Words

व्याप्तं	= Pervaded	अतीव	= Extremely
आत्मानं	= Himself	जीवति	= Lives
गुडः	= gaggery	पारं	= The other end
आसीत्	= Was	वंदे	= I bow down
ग्रीष्मः	= Summer Season	राष्ट्रं	= Country
वाति	= Goes, blows (like air)	क्रीडति	= Plays
		वसंत	= Spring season

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाठ ७

संस्कृत–वाक्यानि ।

रामायणम्

१. रामः उवाच, मातः ! एवं अस्तु । अहं इतः वनं गमिष्यामि । राज्ञः प्रतिज्ञां अनुपालयन् जटाचीरधरः च भविष्यामि । हे देवि ! मन्युः न कार्यः । २ नृपेण पित्रा नियुज्यमानः अहं किं प्रियं न कुर्याम् ? ३. तथापि राजानं आश्वासय । एष अहं अपि गच्छामि दण्डकारण्यं चतुर्दशसमाः वस्तुम् । ४. एतत् श्रुत्वा हृष्टा कैकेयी । ५. कैकेयी उवाच-व्रीडान्वितः नृपः स्वयं न अभिभाषते त्वाम् । यावत् त्वं न यातः असि न तावत् तव पिता स्नास्यते भोक्ष्यते अपि । ६. राजा दशरथः एतत् वचनं श्रुत्वा दीर्घं निःश्वस्य 'धिक् कष्टं' इति उक्त्वा मूर्च्छितः न्यपतत् । ७. कशया हतः वाजी इव रामः अपि वनं गन्तुं कृतत्वरः बभूव । सः राजानं उत्थाप्य उवाच । ८. देव ! न अहं अर्थपरः । मां धर्मे आस्थितं विद्धि । ९. भवतु । मातरं आपृच्छे तावत् । सीतां च अनुनयामि । ततः अद्य एव महत् वनं गमिष्यामि । १० भवत्या तथा कर्तव्यं यथा भरतः राज्यं पालयेत् पितरं च शुश्रुषेत् । ११. विसंज्ञस्य अपि राज्ञः तथा कैकेय्या अपि चरणौ रामः निष्पपात । निष्क्रम्य च अंतःपुरात् स्वं सुहृज्जनं च ददर्श । १२. क्रुद्धः लक्ष्मणः बाष्पपूरित-लोचनः तं अनुजगाम । १३. तदा माता कौसल्या तं आह– हे राम ! राजर्षीणां धर्मशीलानां कुलोचितं धर्मं कीर्तिं आयुः च प्राप्नुहि ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Translation

(1) Rama said— ' Mother ! Let it be so. I shall go to the forest from here. Observing the vow of the king, I shall wear matted hair and the deer skin. O revered lady, do not be angry. (2) Having been ordred by the king, my father, what work do I not carry out ? (3) Yet, console the king. Now, I go to the Dandaka forest to live for fourteen years. (4) Hearing this Kaikeyee was pleased. (5) Kaike yee said, ' The ashamed king, does not tell you himself. Until you go, your father will not bathe nor will he eat. (6) The king Dasharatha having heard this, breathed heavily and having said ' Shame ! Agony ! ' fell down senseless. (7) Like a whipped horse Ram also began to make haste, to go to the forest. Awaking up the king, he said– (8) O lord ! I am not greedy of wealth, please know that I stand on Dharma (Duty). (9) Well ! I ask the mother. I Shall take Sita with me. Then I shall go to the forest tbday only. (10) Do so, that Bharata may protect the kingdom and serve the father. (11) Though senseless, he bowed to the feet of the king as well as Kaikeyee also. Getting away, Rama saw his friends in his own inteior of the palace. (12) The enraged Lakshamana, with eyes filled with tears went behind. (13) Then his mother Kausalya said to him, ' O Rama ! may you have the (good fruits of) Dharma, fame, and long life worthy of the dynasty of the ascetic kings and dutiful great men !

Exercise— Show what are the underlined words.

×

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Note

Let the students practise these sentences well, and let them read the sentences over and over again. Let them at least read them twenty or twenty five times. Now see the sentences with sandhis.

Sentences with Sandhis

मृत्युः सर्वस्येशोऽस्ति। मृत्योरात्मानं रक्ष। इक्षो रसोऽति-मधुरो भवति। इक्षुरसादेव गुडो भवति। इक्षुं भक्षयेदानीम्। स भृत्यानिक्षुभिस्ताडयति। मेरुनामक एकः पर्वतोऽस्ति। इदानीं वायुर्वाति। यथेदानीं वायुर्वाति तथा रात्रौ न वाति। तेनातीव कष्टो भवति। वायुनैव सर्वे जन्तवो जीवन्ति। वायावेव प्राणोऽस्ति।

रामो मातरमुवाच। हे मातः! राज्ञो दशरथस्याज्ञां परिपालयामि। जटाचीरधारी च भवामि, वनं चेदानीमेव गच्छामि। हे देवि! मन्युः न कार्यस्त्वया। किमर्थं मम पिता दशरथो यथापूर्वं मया सह नाभिभाषते। पित्रा नियुज्यमानोऽहं सर्वं तस्याभीष्टं करिष्यामि। विसंज्ञस्यापि राज्ञस्तस्या कैकेय्या अपि चरणौ रामो निष्पपाति। निष्क्रम्य चान्तःपुरात्स्वं सुहृज्जनं च ददर्श।

Lesson 8

In this lesson we show the forms of masculine nouns ending 'ऋ.'

Case	Singular	Dual	Plural
		कर्तृ = Doer	
१	कर्ता	कर्तारौ	कर्तारः
सं०	हे कर्तः	हे कर्तारौ	हे कर्तारः
२	कर्तारं	कर्तारौ	कर्तॄन्

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३	कर्त्रा	कर्तृभ्यां	कर्तृभिः
४	कर्त्रे	कर्तृभ्यां	कर्तृभ्यः
५	कर्तुः	कर्तृभ्यां	कर्तृभ्यः
६	कर्तुः	कर्त्रोः	कर्तृणाम्
७	कर्तरि	कर्त्रोः	कर्तृषु

In this way, the forms of masculine nouns eneding in 'ऋ' are framed. As there is the pronounciation of 'र' in the letter 'ऋ', 'न' is changed into 'ण' just as in the possesive plural form 'कर्तृणां'. There is a little difference in the forms of the word 'पितृ.' See them—

१	पिता	पितरौ	पितरः
सं०	हे पितः	हे पितरौ	हे पितरः
२	पितरं	पितरौ	पितॄन्
३	पित्रा	पितृभ्यां	पितृभिः
४	पित्रे	पितृभ्यां	पितृभ्यः
५	पितुः	पितृभ्यां	पितृभ्यः
६	पितुः	पित्रोः	पितॄणाम्
७	पितरि	पित्रोः	पितृषु

See the difference—

प्रथमा	कर्ता	कर्तारौ	कर्तारः
प्रथमा	पिता	पितरौ	पितरः

Note

Here, just as the form 'कर्तारौ,' 'पितारौ' is not framed, and just as the form 'कर्तारः' 'पितारः' in not framed, but only 'पितरौ' and 'पितरः' are framed. Let the students have this in mind.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वक्तृ = One who talks, a lecturer

१	वक्ता	वक्तारौ	वक्तारः
सं०	हे वक्तः	हे वक्तारौ	हे वक्तारः
२	वक्तारं	वक्तारौ	वक्तॄन्
३	वक्त्रा	वक्तृभ्यां	वक्तृभिः
४	वक्त्रे	वक्तृभ्यां	वक्तृभ्यः
५	वक्तुः	वक्तृभ्यां	वक्तृभ्यः
६	वक्तुः	वक्त्रोः	वक्तॄणाम्
७	वक्तरि	वक्त्रोः	वक्तृषु

In this way, the students can frame the forms of nouns ending in 'ऋ'. For the convenience of the students more masculine nouns ending in ऋ are given, as follow. As previously done, let them frame their forms and construct sentences.

Nouns

स्तोतृ	= One who praises	स्रष्टृ	= Greater
धातृ	= One who supports	भर्तृ	= Protector
विधातृ	= One who supports (God)	निर्मातृ	= a builder, a maker
क्षतृ	= A driver	+ नृ	= man
त्वष्टृ	= a carpenter	+ भ्रातृ	= Brother
		+ जामातृ	= Son-in-law
		+ दित्रृ	= brother-in law

Note- [+ (Words with this mark) have their forms like the word 'पितृ'] Let the students try to frame the forms and construct sentences.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत–वाक्यानि ।

१ जगत्स्रष्टारं अहं पूजयामि । २ स्तोता इदानीं किं वदति ? ३ धात्रा इदं विश्वं रचितम् । ४ तव जामाता कुत्र गतः ? ५ त्वं जामात्रे किं दातुं इच्छसि ? ६ तव जामातुः गृहं अत्र नास्ति । ७ मम पंच भ्रातृभिः एतत् निर्मितम् । ८ क्षत्तारं तत्र इदानीं एव नय । ९ धातुः इच्छा बलीयसी ।

Exercise– Give the names of the underlined forms.

Translation

1 I worship the creator of this universe.
2 What does the man who praises, say now ?
3 The supporter (God) has created the universe.
4 Where has your son–in–law gone ?
5 What do you want to give your son–in–law ?
6 Your son–in law's house is not here.
7 My five brothers have made this.
8 Take the driver there now only.
9 The will of the supporter (God) is the strongest.

Note

The students should practise constructing. sentences in this way. Framing the forms in all the seven cases, it will be easy to use them in sentences. Therefore let the students learn to frame the forms of the words given in this lesson.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Lesson 9

In this lesson, we give the sentences of Ramayana formed in the previous lesson, with Sandhis formed. By reading these, students will have a good knowledge of sandhis.

रामायणम् ।

एवमुक्तो नरसिंहो रामः सीतां समान्यान्तःपुरमत्यगात् । अभिवाद्य च पितुश्चरणौ सुसमाहितः कैकेय्या अपि चरणौ ववन्दे । नृपतिस्तु दीनो न शशाकेक्षितुं किं पुनरभिभाषितुम् ? तच्च नरपते रूपं भयावहं दृष्ट्वा भयमापन्नो रामः ।

कैकेयीमभिवाद्यैमब्रवीत्, कश्चिन्मया नापराद्धं येन मे कुपितः पिता ? कश्चिन्न भरते शत्रुघ्ने मातृणां वा मेऽशुभम् ? नृपे तु कुपिते मुहूर्तमपि जीवितुं नोत्सहे ।

कैकेयी उवाच । राम ! राजा न कुपितः । नास्य किंचन व्यसनं, मनोगतं तु किंचित्त्वद्भयान्नानुभाषते । त्वामप्रियं वक्तुं न प्रवर्ततेऽस्य वाणी । एष हि पुरा मामभिपूज्य वरं च दत्त्वा पश्चात्तप्यते राजा यथाऽन्यः प्राकृतः ।

एतच्छ्रुत्वा रामो व्यथित उवाच । अहो धिक् ! हे देवि ! मामेवं वक्तुं नार्हसि । राज्ञो वचनात्पावकेऽपि पतेयम् । रामो द्विर्नाभिभाषते ।

तत्र मे याचितोऽधुना राजा, भरतस्याभिषेचनं तव चाद्यैव दंडकारण्ये गमनम् । यदि पितरमात्मानं च सत्यप्रतिज्ञं कर्तुमिच्छसि तत्पितुः सन्निदेशे तिष्ठ । नव पंच च वर्षाणि त्वयाऽरण्यं प्रवेष्टव्यम् । त्यक्त्वाऽभिषेकं जटाचीरधारी भव । भरतस्त्वमां पृथिवीं प्रशास्तु ।

मरणोपमं वचः श्रुत्वा रामो न विव्यथे । कैकेयीं चाब्रवीत् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Note

Please read this lesson many a times. By this way, students will learn to read sentences with sandhis and understad them. Now, here we give details of samasas of those that have come in this lesson. Let the students study them—

समासाः ।

नरसिंहः = नराणां सिंहः (A Lion among men)

सुसमाहितः = सुष्ठु समाहितः (Very calm)

नृपतिः = नृणां पतिः (A protector of men)

नरपतिः = नराणां पतिः (A protector of men)

अशुभं = न शुभं (that which is not good)

मनोगतं = मनसि गतं (that which is in mind)

त्वद्भयं = तव भयं (Your fear)

अप्रियं = न प्रियं (harsh)

सत्यप्रतिज्ञः = सत्या प्रतिज्ञा यस्य सः (He whose vow is true)

जटाचीरधारी = जटा च चीरं च जटाचीरे । जटाचीरे धारयतीति जटाचीरधारी । (the wearer of matted hair and deer skin)

मरणोपमं = मरणस्य उपमा यस्य तत् (Like death)

Exercise— Recognise these compounds.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sandhis

For the benefit of the students we give the sentences with sandhis.

चोवाच = च उवाच ।

पितुश्चरणौ = पितुः चरणौ ।

कैकेय्या अपि = कैकेय्याः अपि ।

शशाकेक्षितुं = शशाक ईक्षितुम् ।

तच्च नरपते रूपं = तत् च नरपतेः रूपं ।

नापराद्धं = न अपराद्धं ।

किंचित्त्वद्भयान्नानुभाषते = किंचित् त्वत्–भयात् न अनुभाषते ।

एतच्छ्रुत्वा = एतत् श्रुत्वा ।

तद्ब्रूहि = तत् ब्रूहि ।

Let the students think out the sandhis in this method. By seeing the sandhis only, they will be acquainted with them. When the acquaintance is made thus, there will be no difficulty later on.

Sentences with Sandhi

हे राम ! न कुपितो दशरथो राजा । नाप्यस्य किंश्चिद्दुःखं मनोगतं वर्तते । त्वद्भयाद्भीतोऽयं त्वया सह नानुभाषते । त्वामप्रियं वक्तुं न प्रवर्ततेऽस्य वाणी । इदानीं तदर्थं तप्यते एष राजा दशरथस्तव पिता । एतच्छ्रुत्वा रामो व्यथितः । कैकेयामुवाच । हे देवि ! राज्ञो वचनात्पावकेऽपि पतेयम् । यद्राज्ञोऽभिकांक्षितं तन्मे ब्रूहि, मा चिरम् । रामो द्विर्नाभिभाषते ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Lesson 10

Till now, the students have learnt how to frame the forms of masculine nouns. Now, by a little practic, the knowledge of how to frame the forms of neuter-gender-nouns may be acquired. Therefore, the method is given here. Forms of neuter nouns ending in 'अ' are framed as follow—

Leaving the nominative, vocative and objective cases, the forms of the other cases, are just like the forms of masculive nouns. Let the reader necessarily observe the likeness here. By knowing this, the forms of neuter-gender-nouns may he easily framed.

मित्र शब्दः

१	मित्रं	मित्रे	मित्राणि
सं०	हे मित्र	हे मित्रे	हे मित्राणि
२	मित्रं	मित्रे	मित्राणि

The rest of the forms are like masculine nouns ending in 'अ.'

३	मित्रेण	मित्राभ्यां	मित्रैः
४	मित्राय	मित्राभ्यां	मित्रेभ्यः
५	मित्रात्	मित्राभ्यां	मित्रेभ्यः
६	मित्रस्य	मित्रयोः	मित्राणां
७	मित्रे	मित्रयोः	मित्रेषु

In the word 'मित्र' there is 'र', that is why in the forms 'मित्राणि, मित्रेण, मित्राणां' the न becomes ण.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्द

क्षत्रं = The power or brilliance of a kshatriya
दारिद्र्यं = Poverty
आननं = Face
कुंडलं = ear-rings
कंकणं = Hand-rings (ornament)
भेषजं = medicine
क्षेत्रं = cultivating land
श्रोत्रं = The ear
वसनं = A cloth
अंशुकं = A cloth
क्षौमं = Silk cloth
कौशेयं = Silk cloth
दुकूलं = upper cloth
ब्राह्मण्यं = The duty of a Brahmana
कुलं = Dynasty
वनं = Forest
विपिनं = Forest
काननं = Forest
ताम्रं = Copper
चंदनं = Sandal wood
सख्यं = Friendship
तर्पणं = Satisfaction
चातुर्वर्ण्यं = Arrangement of four divisions of labour, casts
उद्यानं = Garden
यानं = Chariot or cart
वेतनं = Pay

Now, You can frame the forms of these words of neuter gender ending in अ and construct sentences.

१ मम हृदयं कंपते। २ रामचन्द्रस्य क्षेत्रं प्रशंसनीयं। ३ रोगस्य निवारकं औषधं देहि। ४ तस्य क्षेत्रे एकः तडागः अस्ति। ५ मम कंकणं कौशेयं वस्त्रं च कुत्र रक्षितं इति न स्मरामि। ६ तस्य कंकणानि बहूनि सन्ति। ७ जनानां हितार्थाय चातुर्वर्ण्यं कृतम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Translation

1 My heart trembles. 2 The brilliance of a kshatriya in Rama is praise-worthy. 3 Give the medicine that will avert the disease. 4 In his cultivating land there is a tank. 5 Where my hand-rings and silk cloth have been kept, is not remembered. 6 He has many hand-rings with him. 7 For the happiness of man, the arrangement of the four divisions of casts have been created.

Note

Let the student construct many short sentences in this way and practise the use of the nouns. By so much practice the students can frame many sentences.

Lesson 11

In this lesson see the forms of neuter nouns ending in इ.

वारि = Water

१	वारि	वारिणी	वारीणि
सं०	हे वारे, वारि !	हे वारिणी	हे वारीणि
२	वारि	वारिणी	वारीणि
३	वारिणा	वारिभ्यां	वारिभिः
४	वारिणे	वारिभ्यां	वारिभ्यः
५	वारिणः	वारिभ्यां	वारिभ्यः
६	वारिणः	वारिणोः	वारीणाम्
७	वारिणि	वारिणोः	वारिषु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

According to the forms of this noun, let the students frame the forms of neuter-nouns ending in इ. Mostly, in Sanskrit, the necessity of framing the forms of neuter-nouns arrises in connection with adjectives; because independent words are very few, and some nouns are such that their forms are framed in a different manner only. see—

दधि = Curd

१	दधि	दधिनी	दधीनि
सं०	हे दधे, दधि !	हे दधिनी	हे दधीनि
२	दधि	दधिनी	दधीनि
३	दध्ना	दधिभ्याम्	दधिभिः
४	दध्ने	दधिभ्याम्	दधिभ्यः
५	दध्नः	दधिभ्याम्	दधिभ्यः
६	दध्नः	दध्नोः	दध्नाम्
७	दध्नि, दधनि	दध्नोः	दधिषु

The vowel अ disappears in this word as in the word राजन् .

Let the students remember the difference in the forms in the singular numbers, that is seen in this noun. In this way, the forms of the following nouns are framed.

Neuter nouns ending in इ.

अस्थि = A bone. सक्थि = Thigh. अक्षि = The eye.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्यानि

१. सः पुरुषः सक्थ्ना तं ताडयति = That man hits the man by the thigh.

२. अस्थ्ना अस्थि रोहतु = Let the bone grow with the bone.

३. जंतुः अक्षिभ्यां पश्यति = The animal sees with two eyes.

४. सः दध्ना सह ओदनं भक्षयति = He eats the cooked rice with curds.

Now, we give the sentences of Ramayana given in the previous lesson, with Sandhis joined.

संस्कृत–वाचन–पाठः

रामायणम्

राम उवाच, मातः ! एवमस्तु। राज्ञः प्रतिज्ञामनुपालयन् जटाचीरधरश्च भवामि। पिता नियुज्यमानोऽहं किं प्रियं न कुर्याम् ?

तथापि राजानमाश्वासय। एष अहमपि गच्छामि दण्डकारण्यं चतुर्दशसमा वस्तुम्।

एतच्छ्रुत्वा हृष्टा कैकेयी। कैकेय्युवाच— व्रीडान्वितो नृपः स्वयं नाभिभाषते त्वाम्। यावत्त्वं न यातोऽसि न तावत्तव पिता स्नास्यते भोक्ष्यतेऽपि।

राजा दशरथ एतद्वचनं श्रुत्वा दीर्घं निःश्वस्य 'धिक्कष्टं' इत्युक्त्वा मूर्च्छितो न्यपतत्। कशया हतो वाजीव रामोऽपि वनं गन्तुं कृतत्वरो बभूव। स राजानमुत्थाप्योवाच।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवि। नाहमर्थपरः। मां धर्ममास्थितं विद्धि। भवतु मातरमापृच्छ तावत्, सीतां चानुनयामि। ततोऽद्यैव महद्वनं गमिष्यामि। नः स एव धर्मः।

विसंज्ञस्यापि राज्ञस्तथा कैकेय्या अपि चरणौ रामो निष्पपात। निष्क्रम्य चान्तःपुरात्स्वं सुहृज्जनं च ददर्श। क्रुद्धो लक्ष्मणो बाष्पपूरितलोचनस्तमनुजगाम। तदा माता कौसल्या तमाह— हे राम! राजर्षीणां वृद्धानां धर्मशीलानां कुलोचित धर्मं कीर्तिमायुश्चाप्नुहि।

Attempt— Underlined Compound should be dissolved. Why are these called बहुव्रीहि ?

Lesson 12

In this lesson, practise the forms of neuter–nouns ending in 'उ.'

मधुशब्दः

१	मधु	मधुनी	मधूनि
सं० हे मधो, हे मधु !		हे मधुनी !	हे मधूनि !
२	मधु	मधुनी	मधूनि
३	मधुना	मधुभ्यां	मधुभिः
४	मधुने	मधुभ्यां	मधुभ्यः
५	मधुनः	मधुभ्यां	मधुभ्यः
६	मधुनः	मधुनोः	मधूनां
७	मधुनि	मधुनोः	मधुषु

The students can frame the forms of neuter–nouns ending in उ in this waly.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्द

वस्तु = A thing	अश्रु = Tears
मधु = Honey	दारु = Wood
श्मश्रु = The beard	तालु = The palate
जानु = The knee	जतु = Sealing wax
त्रपु = Lead	सानु = Summit of a mountain

Frame the forms of these nouns as shown above and use them in sentences.

संस्कृत वाक्यानि

१. अस्य मधुनः मधुरः गंधः भवति । २. सः इदानीं अश्रूणि मोचयति । ३. त्वं स्वयं एव श्मश्रु मुंडसि वा न ? ४. तव तालुनि का व्यथा अस्ति ? ५. इदानीं तव जानुनी कथं स्तः ?

Translation

1. The smell of this honey is sweet. 2. He sheds tears. 3. Do you shave your beard yourself or not.? 4. What is the pain in your palate ? 5. How are your two knees now ?

Now in this lesson see the meanings of some verses.

श्लोकाः

(महाभारत वन अ. २)

आत्मोपभोगलिप्सार्थं नेयमर्थैप्सुता मम ।
भरणार्थं तु विप्राणां ब्रह्मन्कांक्षे न लोभतः ॥

अन्वयः हे ब्रह्मन् ! इयं मम अर्थैप्सुता आत्मोपभोगलिप्सार्थं न । विप्राणां भरणार्थं तु कांक्षे, न लोभतः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-टीका– हे (ब्रह्मन्)! ब्राह्मण! इयं मम (अर्थेप्सुता) अर्थस्य धनस्य ईप्सुता इच्छा (आत्मोपभोगलिप्सार्थं) आत्मनः उपभोगः आत्मोपभोगः आत्मोपभोगस्य लिप्सा इच्छा आत्मोपभोगलिप्सा। आत्मोपभोगलिप्सार्थं स्वकीयोपभोगस्य इच्छार्थं न नास्ति। विप्राणां ब्राह्मणानां भरणार्थं पोषणार्थं तु एव कांक्षे इच्छामि। न तु लोभतः, लोभेन न कांक्षे।

Meaning— O Brahmana, this my wish of getting riches is not for my enjoyment. But I want the wealth for the protection of the Brahmana's only. Not due to greediness.

कथमस्मद्विधो ब्रह्मन्वर्तमानो गृहाश्रमे।
भरणं पालनं चापि न कुर्यादनुयायिनाम्॥ ५३॥

अन्वय —हे ब्रह्मन्! गृहाश्रमे वर्तमानः अस्मद्विधः अनुयायिनां अपि भरणं पालनं च कथं न कुर्यात्॥

संस्कृत टीका - हे ब्रह्मन्! हे विप्र! गृहाश्रमे गृहस्थाश्रमे वर्तमानः वसन् अस्मद्विधः अस्मत्सदृशः क्षत्रियः अनुयायिनां अनुगामिनां जनानां अपि भरणं पोषणं, पालनं रक्षणं च कथं न कुर्यात्? अस्मत्सदृशेन क्षत्रियेण अवश्यं कर्तव्यम् इति भावः।

Meaning— O Brahmana, how can the protection of our followers (dependents) be not done by Kshatrias like us who live in the house-holders' order.

Note

Let the students read the verses in this way. These verses are fit to be learnt by heart. Let them, therefore, learn the verses by heart and practise reading the meanings first in Sanskrit only. If even after seeing the

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

prose order and the notes in Sanskrit, there remains any difficulty, then only, the translation in English should be seen. Otherwise there is no need. By this, the student's acquaintance with Sanskrit will be more and more. Let, therefore, the students consider this note and practise accordingly.

Sanskrit with Sandhis

अस्मदृशः क्षत्रियोऽनुयायिनामनुगामिनां जनानामपि भरणं पोषणं पालनं रक्षणं च कथं न कुर्यात्? अस्मत्सदृशेन क्षत्रियेणानुयायिनां पालनं अवश्यं कर्तव्यमिति भावः।

Lesson 13

See the neuter nouns ending in 'ऋ' in this lesson.

कर्तृ = The doer.

१	कर्तृ	कर्तृणी	कर्तॄणि
सं०	हे कर्तृ	हे कर्तृणी	हे कर्तॄणि
२	कर्तृ	कर्तृणी	कर्तॄणि
३	कर्त्रा, कर्तृणा	कर्तृभ्यां	कर्तृभिः
४	कर्त्रे, कर्तृणे	कर्तृभ्यां	कर्तृभ्यः
५	कर्तुः, कर्तृणः	कर्तृभ्यां	कर्तृभ्यः
६	कर्तुः, कर्तृणः	कर्त्रोः कर्तृणोः	कर्तॄणाम्
७	कर्तरि कर्तृणि	कर्त्रोः, कर्तृणोः	कर्तृषु

In these forms, the students can see that the forms in the singular number, one set resembles those of the masculine nouns and the other set, those of the neuter nouns. Let the students remember this peculiarity.

+

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

The meaning of 'कर्तृ' is doer; therefore, it is an adjective i. e., if this word is attached with masculine nouns, then the forms are to be framed like those that are given of the masculine order; and when it is to be attached with a neuter noun, then these forms that are in accordance with the neuter gender forms should be used. This rule, during the use of these words is to be remembered.

Nouns

ज्ञातृ = One who knows	गृहीतृ = One who carries
कर्तृ = One who does	वक्तृ = One who talks
दातृ = One who gives	ईशितृ = One who governs
भोक्तृ = One who enjoys	धातृ = One who supports
नेतृ = One who leads or takes	भवितृ = One who is to be

The forms of these nouns are to be framed in masculine order when they are to be used with masculine nouns, and in neuter order when they are to be used with neuter nouns.

Sentences

ज्ञानं एव सर्वस्य कर्तृ अस्ति = Knowledge is the doer of everything.

नेत्रं जन्तोः नेतृ भवति = The eye is the leader of animals.

ब्रह्म सर्वस्य ईशितृ अस्ति = Brahma is the governor of all.

Let the students practise making sentences in this way. Practice in this manner is limited, so more sentences are not given. Now, some verses are being given–

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्लोकाः

(महाभारत वन. अ. २)

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ ५५ ॥

अन्वयः— तृणानि भूमिः उदकं, चतुर्थी सूनृता वाक् एतानि सतां गेहेषु कदाचन न उच्छिद्यन्ते ॥

संस्कृत टीका— तृणानि तृणमयानि आसनानि, भूमिः पृथिवीस्थानं उदकं जलं चतुर्थी सूनृता सत्या वाक् वाणी, एतानि सतां सज्जनानां गेहेषु गृहेषु कदाचन कदा अपि न उच्छिद्यन्ते छिन्नानि न भवन्ति ।

Meaning– Seats of straw, place to sit, water and the fourth good sweet words, there is no lack of these in a good man's house at any time. (i. e. When a guest comes, these things are always at hand to serve him.)

देयमार्तस्य शयनं स्थितश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥ ५६ ॥

अन्वयः— आर्तस्य शयनं देयं, स्थितश्रान्तस्य च आसनं देयं, तृषितस्य च पानीयं, क्षुधितस्य च भोजनम् ।

संस्कृत टीका— आर्तस्य रोगार्तस्य शयनं देयं, स्थितश्रान्तस्य स्थित ऊर्ध्वं स्थितः तत्सहितस्य श्रांतस्य च आसनं देयं, तृषितस्य तृषया क्लिष्टस्य पानीयं जलं देयं, क्षुधितस्य च भोजनं दातव्यम् ।

Meaning– A bed for the sick, a seat for the tired, water for the thirsty, and food for the hungry should always be given.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतिथि सत्कार ।

चक्षुर्दद्यान्मनो दद्याद्वचं दद्यात्सुभाषिणीम् ।
उत्थाय चासनं दद्यादेष धर्मः सनातनः ॥ ५७ ॥

अन्वयः— चक्षुः दद्यात्, मनः दद्यात्, सुभाषिणीं वाचं दद्यात्, उत्थाय च आसनं दद्यात्, एषः सतातनः धर्मः ।

Meaning– (When a guest comes to the house) one should give one's eyes, one's mind, one's sweet words; one should get up and offer his seat; this is the eternal duty. (One should serve the guest with body and soul. 'eye' donotes the body, mint the soul.)

Note— Let the students study these verses well and pay good attention towards the prose order etc., so that there will be no fault in understanding.

Sentences with Sandhis

अस्य मधुनो मधुरो गंधो भवति । स इदानीमश्रूणि मोचयति । त्वं स्वयमेवात्रागच्छ !

हे ब्रह्मन् ! इयं ममार्थेप्सुताऽत्मोपभोगलिप्सार्थं न । विप्राणां भरणार्थं तु कांक्षे, न लोभतः ।

हे ब्रह्मन् ! गृहाश्रमे वर्तमानोऽस्मद्विधोऽनुयायिनामपि भरणं पालनं च कथं न कुर्यात् ?

तस्य क्षेत्र एकस्तडागोऽति ।

Lesson 14

Study the following verses in this lesson.

(महाभारत वन. अ. २)

आत्मार्थं पाचयेन्नान्नं न वृथा घातयेत्पशून् ।
न च तत्स्वयमश्नीयाद्विधिवद्यन्न निर्वपेत् ॥ ५९ ॥

अन्वयः— आत्मार्थं अन्नं न पाचयेत् । पशून् वृथा न घातयेत् । तत् स्वयं अश्नीयात् यत् विधिवत् न निर्वपेत् ।

CC-0. Panini Kanya Maha Vidyalaya Collection. Varanasi.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत-टीका— आत्मार्थं आत्मनः स्वस्य अर्थं स्वार्थाय एव अन्नं भोजनादिकं न पाचयेत् न पक्तव्यम् । पशून् चतुष्पदान् वृथा व्यर्थं न घातयेत् । तत् अन्नादिकं स्वयं न अश्नीयात् भुंजीयात् यत् विधिवत् विधिं अनुसृत्य न निर्वपेत् ॥

Meaning— One should not cook food for the sake of one's self only one should not kill the lower animals for nothing; one should not eat food oneself unless it had been given lawfully.

श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चाऽऽवपेद् भुवि ।
वैश्वदेवं हि नामैतत्सायं प्रातश्च दीयते ॥ ६० ॥

अन्वयः— श्वभ्यः च श्वपचेभ्यः च वयोभ्यः च भुवि आवपेत् । एतत् वैश्वदेवं नाम सायं प्रातः च दीयते ।

संस्कृत-टीका— श्वभ्यः श्वानेभ्यः, श्वपचेभ्यः चाण्डालेभ्यः वयोभ्यः वायसेभ्यः भुवि भूमौ पृथिव्यां आवपेत् निर्वपेत् । एतत् वैश्वदेवनामकं अन्नदानं सायं सायंकाले तथा प्रातःकाले अपि दीयते ।

Meaning— Food for the dogs, for the chandalas, for the crow etc., should be kept on the ground. This gift of food called 'वैश्वदेव' (food for all) is done in the evening as well as in the morning.

विघसाशो भवेत्तस्मान्नित्यं चामृतभोजनः ।
विघसो भुक्तशेषं तु यज्ञशेषं तथाऽमृतम् ॥ ६१ ॥

अन्वयः— तस्मात् नित्यं विघसाशः अमृतभोजनः च भवेत् । भुक्तशेषं तु विघसः, यज्ञशेषं तथा अमृतम् ।

संस्कृत-टीका— तस्मात् पूर्ववतकारणात् एव नित्यं प्रतिदिनं विश्वसाशः विघसं भुक्तशेषं अन्नं अश्नाति इति विघसाशः तथा जनः अमृतं

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यज्ञशेषं अन्नं भोजनं यस्य सः अमृतभोजनः भवेत् । भुक्तशेषं सर्वेषां अतिथीनां भोजनानन्तरं यद् अवशिष्टं तत् अन्नं भुक्तशेषं तद् एव भक्षणीयं अथवा यज्ञशेषं यज्ञस्य शिष्टं अवशिष्टं अन्नं तत् अमृतरूपमेव भवति तत् भक्षणीयम् ।

Meaning— Therefore, that which remains after feeding the guest, and that which remains after performing yajna, (oblations in the fire), is fit to be eaten. That which ramains after the guest has eaten is called '**विघस**' and the remainder after Yajna is called '**अमृत**'.

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥ ६२ ॥

अन्वयः— चक्षुः दद्यात्, मनः दद्यात्, सुनृतां वाचं दद्यात्, अनुव्रजेत् उपासीत, सः पञ्चदक्षिणः यज्ञः ।

Meaning— One should give ones (to the guest), one's mind, good sweet words; one should accompany him; sit by his side; these five are called the yajna with five '**दक्षिणा**' (i. e. gifts).

एवं यो वर्तते वृत्तिं वर्तमानो गृहाश्रमे ।
तस्य धर्मं परं प्राहुः कथं वा विप्र मन्यसे ॥ ६४ ॥

अन्वयः— यः गृहाश्रमे वर्तमानः एवं वृत्तिं वर्तते, तस्य परं धर्मं प्राहुः । हे विप्र ! कथं वा मन्यसे ?

संस्कृत-टीका— यः मनुष्यः गृहाश्रमे गृहस्थाश्रमे वर्तमानः स्थितः एवं ईदृशीं वृत्तिं वर्तते, ईदृशं आचरणं करोति, तस्य मानवस्य धर्मं परं श्रेष्ठं प्राहुः विशेषेण आहुः । हे विप्र ! कथं वा मन्यसे ? तव मतं कीदृक् अस्ति ?

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Meaning— He who is in the house-holder's order, behaves in this way, is said to be the best observer of his duties. O Brahmana, what is your opinion ?

Note

Let the students practise these verses well. By studying the verses, prose order and Sanskrit meanings and thinking over these, the students will be greately benefited. After studying these verses, the progress of the students will in crease.

Sentences with Sandhis

१ रविः प्रातःसमये आगच्छति । आगच्छति प्रातःसमये रविः । रविरागच्छति प्रातःसमये ।

२ स तस्योदयकाल इत्युच्यते । तस्योदयकालः स इत्युच्यते । उच्यते स तस्योदयकाल इति । उदकालस्तस्य स इत्युच्यते ।

३ सः सायंकालेऽस्तं गच्छति । अस्तं गच्छति सः सायंकाले । सोऽस्तं गच्छति सायंकाले । सायंकालेऽस्तं गच्छति सः । गच्छत्यस्तं सः सायंकाले ।

४ त्वयोदधिर्दृष्टो न वा ? उदधिर्दृष्टस्त्वया न वा ? दृष्टस्त्वयोदधिर्न वा ? उदधिस्त्वया दृष्टो न वा ?

५ भूपतिर्भूमिं रक्षति । भूमिं रक्षति भूपतिः । रक्षति भूपतिर्भूमिम् ।

संस्कृत-वाचन-पाठः

Now we show in this lesson how sandhis can be formed by displacing the words to and fro. The students should study them carefully.

आत्मार्थमन्नं न पाचयेत् । न पाचयेदात्मार्थमन्नम् । नात्मार्थमन्नं पाचयेत् । नान्नमात्मार्थं पाचयेत् । न पाचयेदन्नमात्मार्थम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशून्वृथा न घातयेत् । घातयेन्न वृथा पशून् । न घातयेद्वृथा पशून् ।

तत्स्वयं नाश्नीयाद्यद्विधिवन्न निर्वपेत् । नाश्नीयात्तत्स्वयं यद्विधिवन्न निर्वपेत् । विधिवद्यन्न निर्वपेत्तत्स्वयं नाश्नीयात् ।

गृहाश्रमे वर्तमानो य एवं वृत्तिं वर्तते ।

सनातनो धर्म एषः । एष धर्मः सनातनः ।

आसनं चोत्थाय दद्यात् । उत्थाय च दद्यादासनम् । दद्याच्चासनमुत्थाय ।

सतां गेहेष्वेतानि कदाचन नोच्छिद्यन्ते । न कदाचनोच्छिद्यन्ते सतां गेहेष्वेतानि ।

त्वयोदधिर्दृष्टो वा न ? दृष्टस्त्वयोदधिर्वा न ?

यदा मुंबापुरीप्रदेशमहं गतस्तदा त्रयोदधिर्मया दृष्टः । यदा गतोऽहं मुंबापुरीप्रदेशं तदा तत्रोदधिर्मया दृष्टः ।

ऋषिराश्रमे स्थित्वा शिष्याञ्छास्त्रमुपदिशति । शास्त्रं शिष्यानृषिरुपदिशत्याश्रमे स्थित्वा ।

सूर्यस्य रश्मिरद्य शोभनोऽस्ति । शोभनोऽस्त्यद्य रश्मिः सूर्यस्य ।

नृपतिर्नरान् पालयति । पालयति नरान्नृपतिः ।

कुमारास्तं दण्डैस्ताडयन्ति यदा स ग्रामं गच्छति । तं कुमारा दण्डैस्ताडयन्ति यदा स ग्रामं गच्छति ।

श्रुतो वा न दुंदुभेः शब्दस्त्वया ? दुंदुभेस्त्वया शब्दः श्रुतो वा न ? शब्दो दुंदुभेस्त्वया श्रुतो वा न ?

इदानीं दुंदुभेर्महाञ्छब्दो भवति । भवति महाञ्छब्दो दुंदुभेरिदानीम् ।

अस्मिन् गृहे एको बालको दुग्धं पिबति । पिबत्येको बालको दुग्धमस्मिन् गृहे ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Note

Mostly in Sanskrit there is the practice of constructing sentences with words placed to and fro (i. e. not arranged in order). Apart from some exceptions, by doing this way also, there is only one meaning obtained. By placing the words to and fro, only the sandhis differ. The students, should remember this. Hence some sentences are given here and it is shown how sandhis are formed by placing the words to and fro. The students must pay attention particularly in this direction. In this way they will know where and how sandhis are joined.

Lesson 15

सुग्रीवस्य मिलनम् ।

तौ महात्मानौ वरायुधधरौ वीरौ भ्रातरौ रामलक्ष्मणौ दृष्ट्वा सुग्रीवः शङ्कितः अभवत् । ततः भयसंत्रस्तं तं सुग्रीवं हनुमान्वाक्यकोविदः वाक्यं उवाच । एषः वालिकृते महान् संभ्रमः त्यज्यताम्, मलयः अयं गिरिवरः । इह वालिनः भयं नास्ति । सुग्रीवः

Meeting with Sugriva

Seeing those two great souls, and brave brothers Rama and Lakshamana, wearing the best of arms, Sugriva began to doubt. Then Hanumana, an adept in the art of speech, told Sugriva who was moved with fear. " Discard your fear with regnad to Vali. This is the mountain of Malaya, the best of mountains. There is no fear of Vali here. " Sugriva, hearing the good

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तु हनुमतः शुभं वाक्यं श्रुत्वा, ततः शुभतरं वाक्यं हनुमन्तं उवाच- एतौ दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ सुरसुतोपमौ दृष्ट्वा कस्य न भयं स्यात् ?

राजानः हि बहुमित्राः भवन्ति । तस्मात् अत्र विश्वासः न क्षमः । यदि तु एतौ शुद्धात्मानौ, तर्हि जानीहि त्वम् । सुग्रीवस्य महात्मनः वचो निशम्य हनुमान् ऋष्यमूकात् पर्वतात् रामलक्ष्मणौ प्राप्तवान् । मारुतात्मजः हनुमान् ततः कपिरूपं परित्यज्य भिक्षुरूपं भेजे । ततः हनुमान् विनीतवत् उपागम्य राघवौ प्रणिपत्य श्लक्ष्णया सुमनोज्ञया वाचा मृदु वाक्यं उवाच- 'भवन्तौ राजर्षिदेवप्रतिमौ तापसौ वरवर्णिनौ संशितव्रतौ इमं देशं कथं प्राप्तौ ? सुग्रीवः नाम धर्मात्मा कश्चित् वीरः वानरयूथपः भ्रात्रा विनिकृतः दुःखितः जगति भ्रमति ।

---

words of Hanumana, said to Hanumana, better words than those. " Who will not be afraid by seeing these two who are like the sons of gods, with very long arms, very broad eyes, and wearing bows, arrows and sabres.

There are a number of friends to kings. Therefore it is not right to believe them. But if they are pure souls, please find out. " Hearing the words of the great soul Sugriva, Hanumana, went to Rama and Lakshmana from Rishyamuka mountain. Hanumana, the son of Vayu, discarding the form of a monkey wore the form of a mendicant. Then Hanumana, like an humble man, went near, bowed down to Rama and Lakshmana, and spoke sweet and sentences with a beautiful and clear voice. " How did you two who are ascetic like the king of ascetics, who are of beautiful complexion, and who are observing vows, come to this place ? A great soul, Sugriva by name, the best among the monkey warriors being discarded by his brother is roaming about here.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेन सुग्रीवेण महात्मना प्रेषितः हनुमान् नाम वानरः अहं प्राप्तः। स हि युवाभ्यां सख्यं इच्छति। सुग्रीवप्रियकारणात् भिक्षुरूपप्रतिच्छन्नं ऋष्यमूकात् इह प्राप्तं मां तस्य सचिवं विद्धि।' एतत् तस्य वचः श्रुत्वा प्रहृष्टवदनः रामः पार्श्वतः स्थितं भ्रातरं लक्ष्मणं अब्रवीत्। अयं कपीन्द्रस्य महात्मनः सुग्रीवस्य सचिवः इह समाप्तकं आगतः। नूनं अनेन कृत्स्नं व्याकरणं बहुधा श्रुतं यतः बहु व्याहरता तेन न किञ्चित् अपि अपशब्दितम्। अनया चित्रया वाचा कस्य उद्यतासेः अरेः अपि चित्तं नाराध्यते?'

'यस्य पार्थिवस्य एवंविधाः दूताः न भवेयुः तस्य कार्याणि कथं सिद्धयेयुः?' एवं उक्तः वाक्यज्ञः सौमित्रिः वाक्यज्ञं सुग्रीवसचिवं पवनात्मजं अभ्यभाषत- 'विद्वन्! सुग्रीवस्य गुणाः

I, who has been sent by that Sugriva, Hanumana by name, have come to you. He wants the friendship of you two. Please know that I am his minister, who has come here from Rishyamuka, disguised as a mendicant in order to do good to Sugriva. Hearing his words, Rama with pleased appearance told his brother Lakshmana, who was standing beside him. 'This is the minister of Sugriva, who has come to me. Really he has heard all the grammar many times; because, he has not said even one wrong word though he has talked much. By this speech which attracts the hearts, which enemy, though his sabre is drawn, will not have a pleased mind?'

'Which king, that does not have such an ambassador, will be successful in his works?' Having been told thus, Lakshmana who could understand what was said, said to Vayu's son, who could understanp

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदिताः सुग्रीववचनाद् यथा त्वं ब्रवीषि तत्तथा आवां करिष्यावः।' ततः परमसंहृष्टः प्लवगोत्तमः हनुमान् वाक्यविशारदं रामं प्रत्युवाच- 'पंपाप्रण्डितकाननं नानाव्यालमृगैः युतं घोरं वनं सानुजः श्रीमान् किमर्थं आगतः?' तस्य तद्वचनं श्रुत्वा रामचोदितः लक्ष्मण आचचक्षे- 'द्युतिमान् धर्मवत्सलः दशरथः नाम राजा।'

'तस्य अयं जनैः श्रुतः रामः नामः पूर्वजः पुत्रः। राजलक्षणसंयुक्तः राज्यसंपदा च संयुक्तः राज्यात् भ्रष्टः मया सार्धं, हे महाभाग! सीतया भार्यया अनुगतः वने वस्तुं इह आगतः। अहं गुणैः दास्यं उपागतः अस्य नामतः लक्ष्मणः नाम अवरः भ्राता।

---

the speech well. "We have understood the qualities of Sugriva, O learned man! We shall do whatever you say according to Sugriva's words.' Then Hanumana, the best among the monkeys, said to Rama, who was intelligent in speaking, 'Why have you and your brother come to this fearful forest, beautified by the Lake of Pampa, and full of serpents and wild animals?' Hearing these words of his, Lakshamana, directed by Rama, began to say, 'There is a king, Dasharatha by name, who is brilliant and who Loves his duties.

'This is his eldest son renowned as Rama. O man with the wealth of learning! He, who has borne the signs of a King, and who is united with the wealth of a kingdom, having been sent away from his kingdom, has come to live in here with me and with his wife named Sita. On account of his good qualities I have come under his service. I am, known as Lakshamana by

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य भार्या रक्षसा अपहृता । केन कुत्र हृता इति न ज्ञायते । यस्य सीता स्नुषा आसीत्, यश्च धर्मवत्सलः शरण्यः आसीत्, तस्य शरण्यस्य पुत्रः सुग्रीवं शरणं गच्छति । यस्य प्रसादे सततं इमाः प्रजाः प्रसीदेयुः स रामः वानरेन्द्रस्य प्रसादं अभिकांक्षते ।'

एवं करुणं साश्रुपातं ब्रुवाणं सौमित्रिं हनुमान् प्रत्युवाच । 'स हि राज्यात् विभ्रष्टः वालिना कृतवैरः, हृतदारः, भ्रात्रा विनिकृतः, भास्करात्मजः सुग्रीवः अस्माभिः सह सीतायाः परिमार्गणे युवयोः साहय्यं करिष्यति ।' ततः भिक्षुरूपं परित्यज वानरं रूपं आस्थितः तौ वीरौ पृष्ठं आरोप्य कपिकुञ्जरः ऋष्यमूकात् मलयं गिरिं जगाम । तदा च सः कपिराजाय राघवौ

---

name, his younger brother. His wife has been stolen away by a Rakshasa. It is not known who stole her and where she is taken to is not known. The son of him, whose daughter-in-law was Sita, and who, a lover of his duties, was taking all under his shelter, such a son of shelter-giving man, is now going under the shelter of Sugriva. In whose kindness, all the subjects were happy, such a man Rama wants the kindness of the king of the monkeys."

Hanumana began to reply Lakshmana, who was telling thus pitiously and shedding tears; "Sugriva, who has been driven away from the kingdom, whom Vali having made his enemy, whose wife has been snatched away, who has been discarded by his brother, such a son of Surya, mingling with us, shall help you both in this search of Sita.' Then, giving up the form of a mendicant, and adopting the form of a monkey, having set those two warriors on his shoulders, he, the best of

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीरौ आचचक्षे। वानराधिपः सुग्रीवः हनुमतो वाक्यं श्रुत्वा दर्शनीयतमो भूत्वा राघवं प्रीत्या उवाच –

'यदि मे सख्यं रोचते, तर्हि एषः बाहुः प्रसारितः। पाणिना पाणिः गृह्यतां, ध्रुवा मर्यादा च बध्यताम्।' सुग्रीवस्य एतत् सुभाषितं वचनं श्रुत्वा संप्रहृष्टमना रामः पाणिना हस्तं पीडयामास। ततः तौ दीप्यमानं अग्निं प्रदक्षिणां चक्रतुः। सुग्रीवः राघवः च वयस्यत्वं उपागतौ। सुग्रीवः राघवं उवाच– 'त्वं मे हृद्यः वयस्यः असि। नौ एकं दुःखं सुखं च अस्ति। हे राम! सेवकः मन्त्रिसत्तमः अयं ते आख्याति यत् त्वया धीमता लक्ष्मणेन च वियुक्ता रुदती जनकात्मजा रक्षसा अपहृता।'

---

the monkeys went to the mountain of Malaya from Rishyamuka. Then he said to the king of the monkeys all about those two warriors Rama and Lakshmana. Sugriva, the king of the monkeys hearing the words of Hanumana, making himself personable, said with love to Rama—' If my friendship is agreeable to you, then I stretch this my hand. Grasp this hand with yours and make this unshakable limit of friendship i. e. makea vow.' Hearing these good words of Sugriva, Rama, who was pleased, began to press the hand of Sugriva with his. Then they went round the lighted fire. Rama and Sugriva became friends. Sugriva Said to Rama, 'You are my beloved friend. Our happiness and sarrow are common. O Rama! This, servant, the best of ministers, says that you, endowed with wisdom and Lakshmana being bereft of Sita, the daughter of Janaka, was carried away crying by a Rakshasa.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'रक्षसा रौद्रकर्मणा ह्रियमाणा,' 'राम राम' इति 'लक्ष्मण' इति च विस्वरं क्रोशन्ती सा मया दृष्टा। 'शैलतले स्थितं मां दृष्ट्वा शुभानि आभरणानि उत्तरीयं च तया त्यक्तम्। तानि अस्माभिः गृहीतानि निहितानि च। तानि अहं आनयिष्यामि।' एवं उक्त्वा सः सुग्रीवः शैलस्य गहनां गुहां प्रविवेश। तानि आभरणानि उत्तरीयं च गृहीत्वा 'पश्य इदं' इति उक्त्वा दर्शयामास। ततः वासः आभरणानि च गृहीत्वा नीहारेण चन्द्रमाः इव बाष्पसंरुद्धो सः अभवत्। स तं अलङ्कारं उत्तमं बहुशः हृदि कृत्वा बिलस्थः रोषितः सर्पः इव भृशं निश्श्वास।

'लक्ष्मण! ह्रियमाणया वैदेह्या संत्यक्तं शरीरात् उत्तरीयं इदं भूषणानि च पश्य।' एवं रामेण उक्तः तु 'नाहं जानामि केयूरे, नाहं जानामि कुण्डले, नूपुरे तु अभिजानामि नित्यं पादा-

---

'Being carried away by the fearful Rakshasa, she was seen by me crying loudly 'O Rama! Rama! O Lakshamana!' Seeing me, sitting on a rock she threw her upper cloth and beautiful Ornaments. We took and kept them. I shall bring them. Saying this, Sugriva entered the deep cave of the mountain. Having brought the ornaments and the uppercloth, and saying, "Look," began to show them. Seeing, the cloth and the ornaments, Rama was covered with tears like a moon covered with mist. Pressing those good ornaments often to his heart, began to heave long breaths like an angry serpent sitting in a hole.

'O Lakshmana! See the ornaments and the upper cloth, thrown from the body, of Vaidehi, who was being carried away' Lakshmana, having been thus spoken by Rama said,' I do not recognise the two armlets, nor

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिवन्दनात्' इति अगादीत्। ततः राघवः सुग्रीवं इदं अब्रवीत्— 'हे सुग्रीव! कं देशं रौद्ररूपेण रक्षसा ह्रियन्ती मम प्राणप्रिया त्वया लक्षिता? महत् व्यसनं तत् रक्षः क्व वा वसति? यत् निमित्तं अहं सर्वान् राक्षसान् नाशयिष्यामि।' एवं आर्तेण रामेण उक्तः सुग्रीव बाष्पगद्गदः सन् सबाष्पं पाञ्जलिः उवाच—

'तस्य पापरक्षसः निलयं सर्वथा न जाने। तस्य सामर्थ्यं विक्रमं कुलं वा न जानामि। तथापि अरिन्दम! शोकं त्यज। सत्यं प्रतिजानामि यत् तथा करिष्यामि यथा मैथिलीं प्राप्स्यसि। सगणं रावणं हत्वा आत्मपौरुषं परितोष्य तथा कर्ता अस्मि, यथा न चिरात् प्रीतः भविष्यसि। मया अपि भार्याविरहजं व्यसनं प्राप्तं, न च अहं एवं शोचामि, न च धैर्यं परित्यजे, तस्मात्

---

two earrings. Yes, I recognise two anklets, having been accustomed to bow to her feet every day! Then Rama began to say to Sugriva,' Carried by which Rakshasa of fearful form and of which country did you see Sita, beloved as my life? Where does that Rakshasa live who gives me extreme trouble, on account of whom I shall destroy all the Rakshasas. Having been told thus, by the sorrowful Rama, Sugriva, with tears and block throat, said with folded hands—

'I do not know the abode of the sinful Rakshasa; nor do I know his power, his valour or his line of descent. Yet, O the vanquisher of foes! give up all sorrow. I take a true vow that I shall do such things by which you will have Maithilee. Having killed Rawana, with all his followers, I shall satisfy my valour, by which you will be pleased very soon. I also have the sorrow of being separated from my wife; but I do

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैकल्व्यं मा स्मः गमः, आत्मगतं धैर्यं स्मर । ये शोकं अनुवर्तन्ते तेषां सुखं न विद्यते, तेषां तेजः क्षयते ।'

not feel sorry so much, nor do I discard my bravery. So do not be extremely sorry. Remember the bravery that is in you. Those who follow sorrow will never be happy; their brilliance fades.

Lesson 16

Good sayings of Sanskrit

१ नैकं चक्रं परिभ्रमयति = A cart with one wheel, does not move.

२ कार्यान्धस्य प्रदीपो मन्त्रः = For a man who does not know what to do, a Vedic hymn is his guide.

३ अलब्धलाभो नालसस्य = To a lazy man, things which cannot be obtained, are not acquired.

४ हीयमानस्सन्धिं कुर्यात् = When our side is weak, then treaty should be observed.

५ गजपादयुद्धमिव बलवद्विग्रहः = To fight with a mighty one, is just like to fight with an elephant, when we are walking on foot only.

६ आमपात्रमामेन सह विनश्यति = A raw pot or vessel when meets with another raw vessel, is broken.

७ आर्जवं हि कुटिलेषु न नीतिः = It is not proper to behave stright-forwardly with a crooked man.

८ न व्यसनपरस्य कार्यावाप्तिः = A vice person never attains success in his work.

९ अग्निदाहादपि विशिष्टं वाक्पारुष्यम् = A harsh speech is very painful than burning by fire.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
R460.SAT.S
074996
74996

१० आत्मयत्तौ वृद्धिविनाशौ = Our prosperity and degradation depend in our capacity only.

११ नास्त्यग्नेर्दौर्बल्यम् = Fire is weak- should never be said.

१२ कार्यान्तरे दीर्घसूत्रता न कर्तव्या = In the middle of the work, delay should never be done.

१३ क्षीरार्थी वत्सो मातुरूधः प्रतिहन्ति = A child, wishing to suck milk, strikes his mouth in his mother's breasts.

१४ अश्रेयसे न वा कस्य विश्वासो दुर्जने जने ? = Who becomes happy, while believing in a wicked person ?

१५ अतिभारः पुरुषमवसादयति = Heavy burden makes a man unhappy.

१६ क्षुधाऽर्तो न तृणं चरति सिंहः = A Lion never eats grass even of he becomes very hungry.

१७ पिशुनः श्रोता पुत्र दारैरपि त्यज्यते = Even his son and wife leave him who is a back-biter and a fool.

१८ क्षीराश्रितं जलं क्षीरमेव भवति = Water mixed with milk becomes milk.

१९ रजतं कनकसंगात्कनकं भवति = Silver when mixed with gold, becomes gold.

२० अश्नुते स हि कल्याणं व्यसनैर्यो न मुह्यति = One who never gets himself moved by difficulties, becomes happy in this world.

२१ विषं विषमेव सर्वकालम् = Poison will always remain poison.

२२ स्वजनस्य दुर्वृत्तं निवारयेत् = We should always try to cover the vices of our relatives.

CC-0. Gurukul Kangri Collection, Haridwar